# संस्कृत वार्ता:

दिनाङ्क :- 08.10.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- 5 जी-सेवया देशस्य सर्वे जनपदाः संयोजिताः; अङ्कीय-शिक्षया पंचविंशति कोटि-छात्राणां उज्ज्वल-भविष्यं सुनिश्चीयतेऽति प्रधानमन्त्री मोदी।
- देशे 'ए आई' इत्यस्य नियन्त्रणाय आगामि-मासे परामर्श-पत्रं प्रस्तोष्यते इति सूचना प्रसारण -मन्त्री अश्विनी-वैष्णवः।
- औषध-विपणने पारदर्शितायै महती घोषणा। अनैतिक-प्रचाराणां नियन्त्रणार्थं विशेष-समितेः रचनायै सर्वोच्च-न्यायालयस्य आदेशः।
- साहित्य-जगत्सु ऐन्-कार्सन्-महोदयायाः महती विजय-गाथा। षड्विंशत्युत्तरद्विसहस्रतमवर्षस्य नोबेल-पुरस्कारेण विभूषिता भविष्यति केनेडा-देशस्य प्रख्यात-कवयित्री।
- भारतीय-चलच्चित्र-जगतः सुप्रसिद्धः वरिष्ठ-अभिनेता नाना-पाटेकरः पञ्चसप्ततिवयसि दिवङ्गतः।
- आतङ्कवाद-विषये पाकिस्तानस्य छल-नीतिः निरस्ता। आतङ्कि-संरक्षणं छद्म-वेशेन गोपयितुं न शक्यतेऽति भारतस्य स्पष्टः संदेशः।

------------------------------------------

<u>'भारत-मोबाइल-कांग्रेस'</u>

नवदेहल्याः यशोभूमिसभागारे 'भारत-मोबाइल-कांग्रेस'- इति महोत्सवस्य दशम-संस्करणम् उद्घाटयन् प्रधानमन्त्री श्रीनरेन्द्रमोदी न्यगादीत् यत् एषः मञ्चः देशस्य दूरसञ्चार-क्षेत्रे अङ्कीय-सम्पर्क-संवर्धने च अत्यंतं महत्त्वपूर्णां भूमिकाम् ऊढवान्।

श्रीमोदी सप्रश्रयं प्रावोचत् यत् 5-जी सेवा अधुना देशस्य सर्वेषु जनपदेषु प्रसारिता अस्ति। तेन सविशेषं संसूचितं यत् शासनं सम्प्रति पञ्चविंशति-कोटि छात्रान् विभिन्नाङ्कीय-शिक्षा-मञ्चैः सह संयोजयितुं द्रुत-गत्या कार्यं विदधाति।

---------------------------------------------

## अश्विनी-वैष्णवः

सूचना-प्रसारण मन्त्री अश्विनी-वैष्णवः अवदत् यत् देशे कृत्रिम-बुद्धेः – एआई नियन्त्रणाय आगामि-मासे एकं परामर्श-पत्रम् प्रस्तुतं करिष्यते। विश्व-विकास-प्रतिवेदनम् २०२६' इति पुस्तकस्य विमोचनानन्तरं मन्त्री प्रोक्तवान् यत् अस्मिन् परामर्श-पत्रे एआई-सुरक्षा, सैबर-सुरक्षा, एतस्याः लाभाः सम्भाव्य-हानयः च केन्द्रीकृताः भविष्यन्ति।

---------------------------------------------

## सर्वोच्चन्यायालयः

सर्वोच्च-न्यायालयेन केन्द्र-सर्वकाराय त्रिसदस्यीया एका समितिः निर्मातुम् अद्य निर्देशः दत्तः, या औषध-निर्माण-समवायैः चिकित्सकेभ्यः प्रदीयमानानाम् उपहाराणां अथ च अन्य-लाभानां विपणन-पद्धतीनां वैधानिक-नियन्त्रणस्य आवश्यकतां परीक्षेत। शीर्ष-न्यायालयेन अस्य आदेशस्य अनुपालनार्थम् एकम् अनुपालन-शपथपत्रम् उपस्थापयितुं केन्द्र-पक्षः आदिष्टः । प्रकरणस्य अग्रिमं वादश्रवणम् आगामि-जनवरी-मासस्य एकोनत्रिंशत्-दिनाङ्के भविष्यति।

---------------------------------------------

## वायुसेना-वार्षीकी

राष्ट्रेण अद्य भारतीय-वायुसेनायाः चतुर्नवतितमा वार्षीकी सोल्लासं परिपाल्यते। द्वात्रिंशदधिक-एकोनविंशति-शततमे अक्तूबर-मासस्य अष्टमे दिनाङ्के प्रतिष्ठिता इयं सेना देशस्य आकाश-संरक्षणाय वायु-शक्तेः एकां सुदृढां दूरदृष्टिं समस्थापयत्, या दशकेभ्यः राष्ट्र-सुरक्षां पोषयन्ती अस्ति। अत्रावसरे गाजियाबाद-नगरस्थे हिण्डन्-वायुसेना-केन्द्रे उपस्थितान् सम्बोधयन् वायुसेना-प्रमुखः ए. पी. सिंहः सिन्दूराभियाने वायुसेनायाः रण-कौशलस्य संस्मरणं कृतवान्। सः अवोचत् यत् तस्मिन् अभियाने देशेन प्रत्यक्षतया वायुसेनायाः विनाशिनी शक्तिः अथ च प्रभावी-वायु-रक्षा-सञ्चालनं दृष्टम्। अस्मिन् पावन-पर्वणि राष्ट्रपतिपदासीना द्रौपदी-मुर्मूः, उपराष्ट्रपतिः

सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी अथ गृहमन्त्री अमितशाहः सर्वेभ्यः वायु-योद्धृभ्यः , पूर्व-सैनिकेभ्यः तेषां परिवारेभ्यः शुभाशयाः समर्पितवन्तः ।

---------------------------------------------

## नोबेल-पुरस्कार:

साहित्य-क्षेत्रे २०२६ तमस्य वर्षस्य सर्वोच्च-नोबेल-पुरस्कारः केनेडा-देशस्य प्रख्यातायै लेखिकायै ऐन्-कार्सन् इत्यस्यै उद्घोषितः। स्टॉकहोम-नगरस्थया स्वीडिश-अकादमी संस्थया अद्य एषा महती घोषणा कृता।

शास्त्रीय-परम्परायाः आधुनिक-साहित्येन सह श्रुति-मधुरेण सम्वादेन, तस्याः नवोन्मेष-शालिन्याः प्रज्ञायाः कृते च एषा नोबेल-ख्यातिः समर्प्यते। अस्मिन् वर्षे पुरस्कार-रूपेण द्वादश-मिलियन्-स्वीडिश-क्रोनर्-मिता धनराशिः प्रदास्यते।

---------------------------------------------

## जयशङ्करेण-इथियोपिया

विदेशमन्त्रिणा डॉ. एस. जयशङ्करेण इथियोपिया-देशस्य नूतन-विदेशमन्त्रिपदे नियुक्ताय गेडियोन्-तिमोटियोस्-हेस्सेबोन् महोदयाय हार्दाः शुभाशयाः सम्प्रेषिताः।

सामाजिकान्तर्जालीये पटले स्व-सन्देशं प्रसारयन् विदेशमन्त्री प्रोक्तवान् यत् सः भारत-इथियोपिया-देशयोः रणनीतिक-सहयोगम् अधिकं सुदृढं विधातुं कटिबद्धः अस्ति। अनेन द्विपक्षीय-सम्बन्धानां नूतनः अध्यायः प्रारप्स्यते।

---------------------------------------------

## नाना-पटेकर:

भारतीय-चलच्चित्र-जगतः सुप्रसिद्धः वरिष्ठ-अभिनेता नाना-पाटेकरः अद्य प्रातः गोवा-राज्ये स्वीय-गृहे तीव्र-हृद्रोग-घातेन पञ्चसप्तति वयसि दिवङ्गतः।

हिन्दी-मराठी-चलच्चित्रक्षेत्रेषु सुदीर्घ-कालं यावत् 'परिन्दा', 'प्रहार', 'तिरङ्गा', 'क्रान्तिवीर', 'खामोशी', 'अब तक छप्पन', 'वेलकम' इत्यादीनाम् अनेक-कलाकृतीनां माध्यमेन स्वकीयाम् अनुपमां प्रतिष्ठाम् अङ्कितवान् एषः महान् कलाकारः। अस्मिन् असामयिक-निधने राष्ट्रपतिः द्रौपदी मुर्मू, उप-राष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी, सूचना प्रसारण-मन्त्री अश्विनी-वैष्णवः च गभीरं दुःखं प्रकटितवन्तः।

---------------------------------------------

## भारतपाकिस्तानौ

संयुक्त-राष्ट्र-महासभायां भारतेन आतङ्कवाद-विषये पाकिस्तानस्य कपटनीतिः तीव्रतया आक्षिप्ता। भारतेन प्रतिपादितं यत् जैश-ए-मोहम्मद इत्यातङ्की-सङ्घटनस्य प्रमुखस्य मसूद-अजहरस्य विषये सूचनायै पुरस्कार-घोषणां कृत्वा इस्लामाबाद-प्रशासनं स्वस्य आतङ्कवाद-समर्थनम् आच्छादयितुं प्रयतते।भारतेन स्पष्टीकृतं यत् विश्व-समुदायेन नव-एकादश षड्विंशतिः-एकादश अथ च पहलगाम-आक्रमणानां संहारः नैव विस्मृतः । संयुक्त-राष्ट्र-महासभायां स्वस्य प्रत्युत्तराधिकारस्य प्रयोगं कुर्वन् भारतस्य प्रथम-सचिवः रघू-पुरी अवोचत् यत् केवलं घोषणाभिः आतङ्कवादः पराजेतुं नैव शक्यः। सः आतङ्कवादस्य दुष्कर्मकारिणां, वित्त-पोषकाणां अथ च आश्रयदातॄणां विरुद्धं कठोर-कार्याचरणाय आह्वानं विहितवान्।

---------------------------------------------

## संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

।। इति वार्ता: ।।